दिनाङ्क :- 19.01.2026

प्रात: - 06:55

<u>प्रधानमन्त्री -असम</u>

प्रधानमन्त्री नरेन्द्रमोदी ह्य: असम-बङ्गाल राज्ययो: सप्त-सहस्रकोटितोप्यधिकरूप्यकाणां बहविधविकास-परियोजनानां शिलान्यासं कृतवान्। तेन असम-बङ्गाल राज्याभ्यां पञ्च अमृतभारत-एक्स्प्रेस-रेलयानानां हरितध्वजम् अपि प्रदर्शितम्।

प्रधानमन्त्रिणा नरेन्द्रमोदिना असम-राज्यस्य कालियाबोरे सार्द्ध-नवशताधिक-षड्सहस्रकोटिरूप्यकाणां काजीरङ्गा-एलिवेटेड-कॉरिडोर-परियोजनायाः शिलान्यासः कृतः। यत् षड्शीति-किलोमीटर सुदीर्घ-काजीरङ्गा-एलिवेटेड-कॉरिडोर-प्रकल्पः पर्यावरणानुरूपं राष्ट्रिय-राजमार्ग-प्रकल्पः अस्ति। अस्मिन् पञ्चत्रिंशत् किलोमीटर यावत् उन्नतः वन्यजीव-मार्गः भविष्यति, यत् काजीरङ्गा-राष्ट्रिय-उद्यानस्य मध्यक्षेत्रात् गमिष्यति। परियोजनायाः उद्देश्यं उद्यानस्य समृद्ध-जैवविविधतायाः संरक्षणेन सुनिश्चितेन सह क्षेत्रीय-सम्पर्कस्य अभिवृद्धिः अस्ति।

प्रधानमन्त्रिणा असम-राज्यस्य नांगाव-जनपदस्य कालियाबोर-नगरे द्वयो: नूतनयोः अमृतभारत-एक्स्प्रेस-रेलयानयोः हरितध्वजं प्रदर्शितम्। रेलयाने स्तः कामाख्या-रोहतक-अमृतभारत एक्स्प्रेस, डिब्रूगढ़-लखनऊ (गोमतीनगरम्) अमृतभारत एक्स्प्रेस च।

प्रधानमन्त्रिणा नरेन्द्रमोदिना पश्चिमबङ्गालराज्यस्य हुगली-मण्डलस्य सिङ्गूर-नगरे त्रिंशोत्तर-अष्टशत-कोटिरूप्यकाणां बहुविध-विकास-परियोजनानां उद्घाटनं, शिलान्यासं, लोकार्पणं च कृतम्।

<u>भाजपा-राष्ट्रिय-अध्यक्ष:</u>

भारतीय-जनता-पार्टीति दलस्य राष्ट्रिय-अध्यक्षपदस्य निर्वाचनार्थं अद्य नामाङ्कनं भविष्यति। दलस्य राष्ट्रिय-रिटर्निङ्ग् इति निर्वाचनाधिकारिणा के. लक्ष्मण इत्यनेन प्रकाशितस्य मतदान-कार्यक्रमस्य अनुसारं, नामांकनं सायं द्वि तः चतुर्वादन पर्यन्तं भविष्यति, नामांकनपत्राणां परीक्षणं सायं चतुर्वादनात् पञ्चवादन पर्यन्तं भविष्यति, तदनन्तरं नामाङ्कन-निराकरणं सायं षट्वादन पर्यन्तं भविष्यति। नामाङ्कनप्रक्रियायाः समाप्तेः अनन्तरं यदि आवश्यकं भवति तर्हि मङ्गलवासरे मतदानं भविष्यति।

<u>छत्तीसगढ-संघर्षः</u>

छत्तीसगढ-राज्ये रात्रौ सुरक्षासेना-माओवादिनोः मध्ये सङ्घर्ष-विरामः अभवत्। बिजापुरमण्डले शनिवासरात् सङ्घर्षः निरन्तरं प्रचलति स्म। संघर्ष-स्थलात् इतोऽपि द्वौ शवौ प्राप्तौ। अनेनैव संघर्षे हतानां माओवादिनां कुलसङ्ख्या षट् अभवत्, येषु चतस्रः महिला-माओवादिनः अपि सन्ति।

<u>अरब-राष्ट्रपतिः</u>

संयुक्त-अरब्-अमीरात्-देशस्य राष्ट्रपतिः शेख्-मोहम्मद्-बिन्-जायद्-अल्-नहयान इत्येषः अद्य प्रधानमन्त्रिणः नरेन्द्रमोदिनः आमन्त्रणे भारतस्य आधिकारिकयात्रायाम् आगमिष्यति। राष्ट्रपतिरूपेण कार्यभार-ग्रहणानन्तरं शेख् मोहम्मद् बिन् जायद् इत्यस्य भारतस्य एषा तृतीयाधिकारिक-यात्रा भविष्यति तथा च विगत-दशवर्षेषु तस्य पञ्चमं भ्रमणम् भविष्यति।

<u>पोलैंड/उप-प्रधानमन्त्री</u>

पोलैण्ड-देशस्य उप-प्रधानमन्त्री तथा विदेश-मन्त्री राडोस्लाव सिकोरस्की त्रिदिवसीय भारतयात्रां अस्ति, सः अद्य नवदिल्ल्यां विदेशमन्त्रिणा डॉ. एस्. जयशङ्करेण सह मेलनं

करिष्यति। विदेशमन्त्रालयस्य अनुसारं पोलैण्ड-देशः मध्यपूर्वी-यूरोपे भारतस्य बृहत्तमः व्यापार-निवेश-सहभागि अस्ति।

ऋतु-विभागः

भारत-ऋतु-विज्ञान-विभागेन, अद्य उत्तरप्रदेशे सघन-निहाराच्छादनस्य संभावना प्रकटिता अस्ति, तत्रैव दिल्ली, पञ्जाब्, हरियाणा, चण्डीगढ, बिहार-प्रदेशेषु सघन-कुञ्झटीका भविष्यति। पश्चिम-राजस्थाने, उप-हिमालयीय-पश्चिमवङ्गप्रदेशे, सिक्किम्-प्रदेशे च सघन-कुञ्झटीकायाः स्थितिः भविष्यति। आगामिषु चतुर्विंशति होरासु हिमाचलप्रदेशे ओडिशा-राज्ये च कुञ्झटीकायाः स्थितिः भविष्यति। जम्मू-कश्मीरस्य, लद्दाखस्य, गिलगित्-बाल्टिस्तानस्य, मुजफ्फराबादस्य, हिमाचलप्रदेशस्य च केषुचित् भागेषु अल्पवृष्टिः हिमपातः वा भवितुम् अर्हति।

क्रिकेट-क्रीडा

पुरुष-क्रिकेट्-क्रीडायां इन्दौर्-नगरस्य होल्कर्-क्रीडाङ्गणे भारत-न्यूजीलैण्ड्-देशयोः मध्ये एकदिवसीय शृङ्खलायाः तृतीयान्तिम-क्रीडायां न्यूजीलैंड दलेन भारतं एकचत्वारिंशत् धवनाङ्कैः पराजितम्।